# Narasimha Gadyam



भक्तिमात्रप्रतीत नमस्ते नमस्ते नमस्ते अखिलमुनिजननिवह विहितसवनकदनकर खरचपलचरितभयद बलवदसुरपतिकृत विविधपरिभवभयचकित निजपदचलित निखिलमखमुखविरहकृशतर जलजभवमुख सकलसुरवरनिकर कारुण्याविष्कृत चण्डदिव्य नृसिंहावतार स्फुरितोदग्रतारध्वनिभिन्नाम्बरतार निजरणकरण रभसचलित रणदसुरगणपटुपटह विकटरवपरिगत चटुलभटरवरणित परिभवकर धरणिधर कुलिशघट्टनोद्भूत ध्वनिगम्भीरात्मगर्जित निर्जितघनाघन ऊर्जितविकटगर्जित सृष्टखलतर्जित सद्गुणगुणोर्जित योगिजनार्जित सर्वमलवर्जित लक्ष्मीघनकुचतटनिकटविलुण्ठन विलग्नकुङ्कुम पङ्कशङ्काकरारुण मणिकिरणानुरंजित विगत शशाकलङ्क शशाङ्कपूर्णमण्डलवृत्त स्थूलधवल मुक्तामणिविघट्टित दिव्यमहाहार ललितदिव्यविहार विहितदितिजप्रहार लीलाकृतजगद्विहार संसृतिदुःखसमूहापहार विहितदनुजापहार युगान्तभुवनापहार अशेषप्राणिगणविहित सुकृतदुष्कृत सुदीर्घदण्डभ्रामित बृहत्कालचक्र भ्रमणकृतिलब्धप्रारम्भ स्थावरजङ्गमात्मक सकलजगज्जाल जलधारणसमर्थ ब्रह्माण्डनामधेय महापिठरकरणप्रवीण कुम्भकार निरस्तसर्वविस्तार निरस्तषड्भावविकार विविधप्रकार त्रिभुवनप्रकार अनिरूपितनिजाकार नियतभिक्षादिलब्ध गतरसपरिमित भोज्यमात्रसन्तोष बलविजित मदमदन निद्रादिदोष जनधनस्नेहलोभादि दृढबन्धनच्छेद लब्धसौख्य सततकृत योगाभ्यास निर्मलान्तःकरण योगीन्द्रकृतसन्निधान सकलप्रधान मायापिधान सुशुभाभिधान मदविकसदसुरभट मकुटवनानलनिभनयन विलसदसिकवचभुज घनवनलवन

नवरुधिरक्रमकल्पित मीनशश्वत्तरङ्गशैवाल महाजलूक दुस्तर पङ्कजलनिवहकलित महासुरपूतनाक मलिनीविलोलनकेलिप्रिय मत्तवारण दुष्टजनमारण शिष्टजनतारण नित्यसुखविचारण सिद्धबलकारण सुदुष्टासुरदारुण सदृशीकृताञ्जन जनदोषभञ्जन घनचिन्निरञ्जन निरन्तरकृतभक्तवाञ्छन विश्वनाटकसूत्रधार अङ्घ्रिधूलिजातखसिन्धुधार मध्वसृक्कृतचक्रधार जनितकाम विगतकाम सुरजनकाम उधृतक्षम निश्चलजनसत्क्रियाक्षम सुरनतचरण धृतरथचरण विविधसुरविहरण विगतविकार विकरण विबुधजनशरण सततप्रीत त्रिगुणव्यतीत प्रणतजनवत्सल नमस्ते नमस्ते ॥

जय जय श्रीलक्ष्मीनृसिंह ।
जय जय श्रीलक्ष्मीनृसिंह ॥

bhaktimātrapratīta namaste namaste namaste akhilamunijananivaha vihitasavanakadanakara kharacapalacaritabhayada balavadasurapatikṛta vividhaparibhavabhayacakita nijapadacalita nikhilamakhamukhavirahakṛśatara jalajabhavamukha sakalasuravaranikara kāruṇyāviṣkṛta caṇḍadivya nṛsiṃhāvatāra sphuritodagratāradhvanibhinnāmbaratāra nijaraṇakaraṇa rabhasacalita raṇadasuragaṇapaṭupaṭaha vikaṭaravaparigata caṭulabhaṭaravaraṇita paribhavakara dharaṇidhara kuliśaghaṭṭanodbhūta dhvanigambhīrātmagarjita nirjitaghanāghana ūrjitavikaṭagarjita sṛṣṭakhalatarjita sadguṇaguṇorjita yogijanārjita sarvamalavarjita

lakṣmīghanakucataṭanikaṭaviluṇṭhana vilagnakuṅkuma paṅkaśaṅkākarāruṇa
maṇikiraṇānuraṃjita vigata śaśākalaṅka śaśāṅkapūrṇamaṇḍalavṛtta sthūladhavala
muktāmaṇivighaṭṭita divyamahāhāra lalitadivyavihāra vihitaditijaprahāra
līlākṛtajagadvihāra saṃsṛtiduḥkhasamūhāpahāra vihitadanujāpahāra
yugāntabhuvanāpahāra aśeṣaprāṇigaṇavihita sukṛtaduṣkṛta sudīrghadaṇḍabhrāmita
bṛhatkālacakra bhramaṇakṛtilabdhaprārambha sthāvarajaṅgamātmaka sakalajagajjāla
jaladhāraṇasamartha brahmāṇḍanāmadheya mahāpiṭharakaraṇapravīṇa kumbhakāra
nirastasarvavistāra nirastaṣaḍbhāvavikāra vividhaprakāra tribhuvanaprakāra
anirūpitanijākāra niyatabhikṣādilabdha gatarasaparimita bhojyamātrasantoṣa balavijita
madamadana nidrādidoṣa janadhanasnehalobhādi dṛḍhabandhanaccheda labdhasaukhya
satatakṛta yogābhyāsa nirmalāntaḥkaraṇa yogīndrakṛtasannidhāna sakalapradhāna
māyāpidhāna suśubhābhidhāna madavikasadasurabhaṭa makuṭavanānalanibhanayana
vilasadasikavacabhuja ghanavanalavana navarudhirakramakalpita
mīnaśancattaraṅgaśaivāla mahājalūka dustara paṅkajalanivahakalita mahāsurapṛtanāka
malinīvilolanakelipriya mattavāraṇa duṣṭajanamāraṇa śiṣṭajanatāraṇa nityasukhavicāraṇa
siddhabalakāraṇa suduṣṭāsuradāruṇa sadṛśīkṛtānjana janadoṣabhanjana ghanacinniranjana
nirantarakṛtabhaktavānchana viśvanāṭakasūtradhāra aṅghridhūlijātakhasindhudhāra
madhvasṛklṛtacakradhāra janitakāma vigatakāma surajanakāma udhṛtakṣama
niścalajanasatkriyākṣama suranatacaraṇa dhṛtarathacaraṇa vividhasuraviharaṇa

vigatavikāra vikaraṇa vibudhajanaśaraṇa satataprīta triguṇavyatīta praṇatajanavatsala namaste namaste ||

jaya jaya śrīlakṣmīnṛsiṃha |
jaya jaya śrīlakṣmīnṛsiṃha ||

www.kamakotimandali.com